योगवासिष्ठः/प्रकरणम् ६ (निर्वाणप्रकरणस्य उत्तरार्धम्)/सर्गः ०९०

नवतितमः सर्गः ९०

श्रीराम उवाच ।

अनन्तरं वद ब्रह्मञ्जगन्ति भवता तदा ।

भूमण्डलानां हृदये क्वचिद्दृष्टानि नैव वा ।। १

श्रीवसिष्ठ उवाच ।

परात्मजाग्रत्स्वप्नोर्वीमण्डलौघात्मना मया ।

ततोऽनुभूतं हृदये दृष्टं च परया दृशा ।। २

यावत्तथैव सर्वत्र जगज्जालमवास्थितम् ।

सर्वं दृश्यमयं शान्तमपि द्वैतमयात्मकम् ।। ३

जगन्ति सन्ति सर्वत्र सर्वत्र ब्रह्म संस्थितम् ।

सर्वं शून्यं परं शान्तं सर्वमारम्भमन्थरम् ।। ४

सर्वत्रैवास्ति पृथ्व्यादि स्थूलं तच्च न किंचन ।

चिद्व्योमैव यथा स्वप्नपुरं परमजातवत् ।। ५

नेह नानास्ति नो नाना न नास्तित्वं न चास्तिता ।

अहमित्येव नैवास्ति यत्र तत्र कुतोऽस्ति किम् ।। ६

अनुभूतमपीदं सदहमित्यादिरूपकम् ।

नास्त्येव यदि वाप्यस्ति तद्ब्रह्माजमनामयम् ।। ७

यत्स्वप्नपुरमेवेदं सर्गादावेव चिन्नभः ।

अस्तितानास्तिते तत्र कीदृशे क्व कुतः स्थिते ।। ८

यथाहं दृष्टवांस्तानि जगन्त्यवनिरूपधृक् ।

तथा मया जलीभूय दृष्टं तादृशमेव तत् ।। ९

वारिधारणया वारि भूत्वा जडमिवाजडम् ।

समुद्रमन्दिरेष्वन्तश्चिरं गुलगुलायितम् ।। 6.2.90.१०

तृणवृक्षलतागुल्मवल्लीनां स्तम्भनाडिषु ।

मृद्वलक्षितमारूढं तवाङ्गेष्विव यूकया ।। ११

सर्वोत्थानोपमास्तम्भे तच्छेदे वलयोपमा ।

मृद्व्या कर्णाहिगत्येव रचना प्रकृतोदरे ।। १२

वल्लीतमालतालादिपल्लवेषु फलेषु च ।

विश्रम्य पुष्टयाऽऽकृत्या रेखाविरचनं कृतम् ।। १३

मुखेनाविश्य हृदयमृतुवैधुर्यधारिणा ।

हृता विधुरिता भुक्ता लूना देहेषु धातवः ।। १४

सुप्तं पल्लवतल्पेषु प्रालेयकणरूपिणा ।

तुल्यकालमशेषेषु दिक्षु सर्वास्वखेदिना ।। १

नानाह्रदनदीगेहग्राहिणाऽविरताध्वना ।

विश्रान्तं सेतुसुहृदः प्रसादेन क्वचित्क्वचित् ।। १६

विदाऽविदनुसंधानाज्जडेन तदनाश्रयात् ।

जडाशयेषूल्लसितं जलेनावर्तवर्तिना ।। १७

मया दुष्कृतिनेवोर्ध्वशिलास्वस्थेन भूभृताम् ।

स्वावर्तवर्तिना श्वभ्रपातेषु शतधा गतम् ।। १८

धूमरूपेण निर्गत्य दारुभ्यो गगनार्णवे ।

कणरत्नेन नीलर्क्षमण्यन्तर्वर्तिना स्थितम् ।। १९

विश्रान्तमभ्रपीठेषु विद्युद्वनितया सह ।

भिन्नेन्द्रनीलनीलेन शेषाङ्गेष्विव शौरिणा ।। 6.2.90.२०

परमाणुमये सर्गे पिण्डरूपेष्वलक्षितम् ।

स्थितमन्तःपदार्थेषु ब्रह्मणैवाखिलात्मना ।। २१

प्राप्य जिह्वाणुभिः सङ्गमनुभूतिः कृतोत्तमा ।

यामात्मनो न देहस्य मन्ये ज्ञानस्य केवलम् ।। २२
न मया न च देहेन नान्येनास्वादितात्म यत् ।
तदन्तर्विवृतं चेत्यमज्ञानाय तदप्यसत् ।। २३
सर्वर्तुरसरूपेण नानामोदानि दिक्ष्वलम् ।
भुक्तानि पुष्पजालानि प्रोच्छिष्टं ददतालये ।। २४
चतुर्दशप्रकाराणां भूतानामङ्गसन्धिषु ।
उषितं चेतनेनेव जडेनाप्यजडात्मना ।। २५
सीकरोत्कररूपेण रथमारुह्य मारुतम् ।
आमोदेनेव विहितं विमलव्योमवीथिषु ।। २६
राम तस्यामवस्थायां परमाणुकणं प्रति ।
अनुभूतमशेषेण यथास्थितमिदं जगत् ।। २७
अजडेन जडेनेव समया जालया तया ।
अन्तःसर्वपदार्थानां ज्ञाताज्ञातेन संस्थितम् ।। २८
जगतां तत्र लक्षाणि नाशोत्पातशतानि च ।
मया दृष्टानि रूढानि कदलीदलपीठवत् ।। २९
एवं जगच्चाजगद्वा साकारं वा निराकृति ।
चिन्मात्रगगनं सर्वमाकाशाधिकनिर्मलम् ।। 6.2.90.३०
न किंचनत्वं च न किंचनेदं
शुद्धः परो बोध इदं विभाति ।
स चापि नो किंचन नापि शून्य-
माकाशमेवासि विकासमास्व ।। ३१

इत्यार्षे श्रीवासिष्ठमहारामायणे वा० दे० मो० निर्वाणप्रकरणे उ० पाषा० जलजगद्वर्णनं नाम नवतितमः सर्गः ।। ९० ।।